तत्पर्य्यायः । शिखण्डकः २ । इत्यमरः । २ । ६ । ९९ ॥ शिखाण्डकः ३ शिखण्डः ४ । इति तट्टीका ॥ (यथा, रघुः । ११ । १ ।

"कौशिकेन स किल क्षितीश्वरो
राममध्वरविघातशान्तये ।
काकपक्षधरमेत्य याचित-
स्तेजसां हि न वयः समीक्ष्यते" ॥)

काकपदः, पुं, (बन्धस्य काकपदवदाकारवत्त्वात् काकपद इव आकृतिरस्यस्य ।) रतिबन्धविशेषः तस्य लक्षणम् । यथा,—
"पादौ द्वौ स्कन्धयुग्मस्थौ कृत्वा लिङ्गं भगे बधु ।
कामयेत् कामुकीं कामी बन्धः काकपदो मतः" ॥
इति रतिमञ्जरी ॥

काकपर्णी, स्त्री, (काक इव कृष्णं पर्णं यस्याः । गौरादित्वात् ङीष् ।) मुद्गपर्णी । इति भावप्रकाशः ॥ ("मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला ।
चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत् ।
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित्" ॥
इति च भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे ॥)

काकपीलुः, पुं, (काकप्रियः पीलुः ।) काकतिन्दुकः । काकतुण्डी । श्वेतगुञ्जा । इति राजनिर्घण्टः । (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।
"श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकानन्ती च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी" ॥
विशेषविवरणमस्य च गुञ्जाशब्दे ज्ञेयम् ॥)

काकपीलुकः, पुं, (काकपीलु + संज्ञायां कन् ।) काकतिन्दुकवृक्षः । इत्यमरः । २ । ४ । ३९ । माकड़ाकेन्दु इति भाषा ॥

काकपुच्छः, पुं, (काकस्य पुच्छ इव पुच्छो यस्य ।) कोकिलः । इति शब्दरत्नावली ॥

काकपुष्टः, पुं, (काकेन पुष्टः । कोकिल्या हि निजाण्डस्फोटनाशक्ततया काकाण्डं तन्नीड़ात् निक्षिप्य तत्र स्वकीयाण्डं स्थापयित्वा काकद्वारा स्वापत्यपोषणात् अस्य तथात्वम् ।) कोकिलः । इति त्रिकाण्डशेषः ॥

काकपुष्पं, क्ली, (काकवत् कृष्णं पुष्पमस्य ।) गन्धपर्णम् । इति राजनिर्घण्टः ॥

काकफलः, पुं, (काकप्रियं फलमस्य ।) निम्बवृक्षः । इति राजनिर्घण्टः ॥ (निम्बशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

काकबलिः, पुं, (काकेभ्यो देयो बलिरन्नादिकम् ।) काकसम्प्रदानकान्नादि । तद्दानविधिर्यथा ।
ॐयमद्वारावस्थितनानादिग्देशीयवायसेभ्यो नमः ।
इति पाद्यादिभिरभ्यर्च्य प्रार्थयेत् ।
"ॐ काक त्वं यमदूतोऽसि गृहाण बलिमुत्तमम् ।
यमलोकगतं प्रेतं त्वमाप्याययितुमर्हसि ॥
ॐ काकाय काकपुरुषाय वायसाय महात्मने ।
अयं पिण्डं प्रयच्छामि कथ्यतां धर्म्मराजनि" ॥
इति पूरकपिण्डदानान्ते हलायुधः ॥ * ॥
बलिवैश्वदेवान्तर्गततद्विधिर्यथा,—
"ऐन्द्रवारुणवायव्याः सौम्या वै नैरृतास्तथा ।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्" ।
ॐ काकेभ्यो नमः । इति दद्यात् तदुपरि अद्भिः सिञ्चेत् । इत्याह्निकाचारतत्त्वम् ॥ * ॥
गयायां तद्विधिर्यथा,—
"बलिः काकशिलायाञ्च काकमोक्षणमोक्षदः" । इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये ४ अध्यायः ॥ तत्र तृतीयदिनकृत्ये काकबलिदानं यथा,—
"ततः काकबलिं कृत्वा पुनः स्नानं समाचरेत् ।
ऐन्द्रवारुणवायव्या याम्या वै नैरृतास्तथा ॥
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्" ॥
इति श्रीवायुपुराणे ७ अध्यायः ॥

काकभाण्डी, स्त्री, (काकस्य मुखोद्भवरसकारणस्य ईषज्जलस्य भाण्डी क्षुद्रभाण्डमिव । तत्फलभक्षणेन मुखात् ईषज्जलक्षरणात् अस्यास्तथात्वम् ।) महाकरञ्जः । इति राजनिर्घण्टः ॥

काकभीरुः, पुं, (काकात् भीरुर्भयशीलः ।) पेचकः । इति त्रिकाण्डशेषः ॥

काकमद्गुः, पुं, (काक इव कृष्णो मद्गुर्जलचरपक्षिविशेषः) दात्यूहपक्षी । इति त्रिकाण्डशेषः ॥ (डाउकपाखी इति भाषा ॥ यथा, महाभारते १३ । दानधर्म्मे संसारचक्रकथने १११ । १२१ ।
"घृतं हृत्वा तु दुर्ब्बुद्धिः काकमद्गुः प्रजायते" ॥)

काकमर्द्दः, पुं, (काकं मृद्नातीति । काक + मृद् + अण् ।) महाकालवृक्षः । इति राजनिर्घण्टः ॥

काकमर्द्दकः, पुं, (काकमर्द्द + संज्ञायां कन् ।) महाकाललता । इति रत्नमाला । माकाल् इति भाषा ॥

काकमाचिका, स्त्री, (काकमाची + स्वार्थे कन् ।) काकमाचीवृक्षः । इति शब्दरत्नावली ॥

काकमाची, स्त्री, (काकान् मचते अर्च्चयति फलदानेनेति । मचि + अण् + गौरादित्वात् ङीष् पृषोदरादित्वात् न लोपः ।) क्षुद्रवृक्षविशेषः । गुड़कामाइ इति भाषा । तत्पर्य्यायः । वायसी २ । इत्यमरः । २ । ४ । १५१ ॥ ध्वाङ्क्षमाची ३ वायसाह्वा ४ सर्व्वतिक्ता ५ बहुफला ६ कटफला ७ रसायनी ८ गुच्छफला ९ काकमाता १० स्वादुपाका ११ सुन्दरी १२ तिक्तिका १३ बहुतिक्ता १४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफशूलार्शःशोथदोषकुष्ठकण्डूनाशित्वञ्च । इति राजनिर्घण्टः । त्रिदोषशमताकारित्वम् । स्वरत्वम् । रसायनत्वम् । नातिशीतलत्वम् । नात्युष्णत्वम् । हृद्यत्वम् । भेदकत्वञ्च । इति राजवल्लभः ॥ (तथाच भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ।
"काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा ॥
तिक्ता रसायनी शोथकुष्ठार्शोज्वरमेहजित् ।
कटुर्नेत्रहिता हिक्काच्छर्द्दिहृद्रोगनाशिनी" ॥)

काकमाता, स्त्री, (काकस्य मातेव पोषिका । काकस्य तत्फलप्रियत्वात् ।) काकमाची । इति राजनिर्घण्टः ॥ (काकमाचीशब्दे पर्य्यायगुणादिकं ज्ञेयम् ॥)

काकमुद्गा, स्त्री, (काकेन ईषज्जलेन मुदं गच्छतीति । काकमुद + गम + ड + टाप् ।) मुद्गपर्णीवृक्षः । इत्यमरः । २ । ४ । ११३ ॥ मुगानी इति भाषा ॥ (अस्याः पर्य्यायो यथा,—
"मुद्गपर्णी काकपर्णी सूर्य्यपर्ण्यल्पिका सहा ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ गुणादयोऽस्या मुद्गपर्णीशब्दे ज्ञेयाः ॥)

काकयवः, पुं, (काकमीषज्जलं यत्र तादृशो यव इव नीरसत्वात्, यद्वा काकवन्निर्गुणो यवः ।) तण्डुलशून्यधान्यम् । आगड़ा इति भाषा ॥
("यथा फलाः षण्ढतिलाः यथा चर्म्ममया मृगाः ।
तथैव पाण्डवाः सर्व्वे यथा काकयवा इव" ॥ इति महाभारते सभापर्व्व ॥ तथा पञ्चतन्त्रे २ । ८५ ।
"यथा काकयवाः प्रोक्ता यथारण्यभवास्तिलाः ।
नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः" ॥)

काकरुहा, स्त्री, (काक इव रोहति मूलशून्यतया वृक्षाद्यवलम्बनेन जायते इति । काक + रुह + कः । काकवत् परपुष्टतयास्यास्तथात्वम् । यद्वा काकपुरीषात् रोहति उत्पद्यते वृक्षोपरीत्यर्थः अतएव तत् संज्ञयाख्यायते ।) वन्दावृक्षः । इति त्रिकाण्डशेषः ॥

काकरुकः, पुं, (कु कुत्सितं करोतीति । कु + कृ + ऊकः । कोः कादेशः ।) स्त्रीजितः । उलूकः । दम्भः । दिगम्बरभीरुकनिर्धनेषु त्रि । इति हेमचन्द्रः ॥

काकलं, क्ली, (ईषत्कलो यस्मात् । कोः कादेशः ।) कण्ठमणिः । इति त्रिकाण्डशेषः । (ग्रीवायामुन्नतदेशः । इति सुश्रुतः । टुँटि इति भाषा ।)

काकलः, पुं, (का इत्याकारः कलो यस्य ।) द्रोणकाकः । इति शब्दरत्नावली ॥

काकलकः, पुं, (काकलं ततः कप् पुंस्त्वञ्च ।) कण्ठमणिः । इति हेमचन्द्रः ॥

काकलिः, स्त्री, (कल + इन् कलिः । कु ईषत् कलिः । कोः कादेशः ।) सूक्ष्ममधुरास्फुटध्वनिः । इत्यमरटीकायां भरतः ॥ ("कोकिलकाकलिकूजितकुञ्जम्" । इति शिष्टप्रयोगः ॥)

काकली, स्त्री, (काकलि + कृदिकारान्तत्वात् वा ङीष् ।) सूक्ष्ममधुरास्फुटध्वनिः । इत्यमरः । १ । ७ । २ ॥ (यथा, गीतगोविन्दे । १ । ४ । ११ ।
"उन्मीलन् मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीड़त्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः" ॥)

काकलीद्राक्षा, स्त्री, (काकलीव सूक्ष्मा द्राक्षा ।) द्राक्षाप्रभेदः । किस्मिस् इति ख्याता । तत्पर्य्यायः । जम्बूका २ फलोत्तमा ३ लघुद्राक्षा ४ निर्वीजा ५ सुवृत्ता ६ रसाधिका ७ । तस्या गुणाः । मधुरत्वम् । अम्लत्वम् । रसालत्वम् । रुचिकारित्वम् । शिशिरत्वम् । श्वासकासनाशित्वम् । जनवल्लभत्वञ्च । इति राजनिर्घण्टः ॥

काकलीरवः, पुं, (काकली मधुरास्फुटो रवो यस्य ।) कोकिलः । इति राजनिर्घण्टः ॥ (सूक्ष्ममधुरास्फुटध्वनौ तु कर्म्मधारयः ॥)

काकवल्लरी, स्त्री, (काकप्रिया वल्लरी ।) स्वर्णवल्ली ।